# संस्कृतवार्ता:

दिनाङ्क : 29/08/2025 सायम् - 06:20

## आदौ-मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी टोक्यो नगरे पञ्चदशे भारत-जपान वार्षिकसम्मेलने भागम् अगृह्णात्; उभावपि देशौ द्विपाक्षिकबन्धानां समीक्षां कृतवन्तौ।
- बिहारराज्यस्य मन्त्रिमण्डलेन प्रत्येकस्मात् कुटुम्बात् चितायै एकस्यै महिलायै स्ववृत्त्यर्थम् आर्थिकसहायतां प्रदातुं नूतना योजना अनुमोदिता।
- हॉकी-क्रीडायाः ख्यातनाम्नः मेजर ध्यानचन्दस्य जन्मवार्षिक्याः स्मृतौ अद्य राष्ट्रिय-क्रीडा-दिवसः आचर्यते।
- उत्तराखण्ड-राज्यस्य रुद्रप्रयाग-चमोली-क्षेत्रयो: मेघस्फोटः व्यापकं क्षतिमकरोत्, जम्मू-कश्मीर-प्रदेशे च निरन्तरं चतुर्थदिनं यावत् रेलयानस्य यातायातः पक्षाघातितोऽस्ति; अद्य चत्वारिंशत् रेलयानान्यपि निरस्तानि।

## अथ वार्ताः विस्तरेण

### भारत-जापान शिखर सम्मेलनम्-पीएम टोकियो

प्रधानमन्त्री नरेन्द्रमोदी अद्य टोक्यो-नगरे जापान-देशस्य समकक्षीयेण शिगेरु इशिबा इत्यनेन सह पञ्चदशे भारत-जापान वार्षिकसम्मेलने भागम् अगृह्णात्। शिखरसम्मेलने नेतृभ्यां द्विपाक्षिकसम्बन्धानां सम्पूर्णा समीक्षा कृता। नेतारौ विशेष-सामरिक-वैश्विक-सहभागित्वस्य अग्रिमचरणस्य प्रगतिविषये च चर्चां कृतवन्तौ। संयुक्त-पत्रकारसम्मेलनं सम्बोधयन् प्रधानमन्त्री मोदी अवदत् यत् अद्यतनीया तेषां चर्चा फलदायिका उद्देश्यपूर्णा च आसीदिति। सः अवदत् यत् विश्वशान्त्यै स्थिरतायै च भारत-जपान्-सहभागित्वम् आवश्यकमस्ति।

अग्रिमदशकाय मार्गचित्रं निर्मितम् अस्ति इति श्रीमोदी सूचितवान्।

जापान्-देशस्य प्रधानमन्त्री स्वकीये वक्तव्ये अवदत् यत् भारतं नवान्वेषण-माध्यमेन सम्पूर्णे विश्वे परिवर्तनं आनयदस्ति। सः अवदत् यत् परस्परपूरकः पारस्परिकश्च सम्बन्धः भारत-जापान्-देशाभ्यां लाभप्रदः अस्तीति।

### बिहार-नीतिशः

बिहारस्य मुख्यमन्त्री नितीशकुमारः दरभङ्गा-नगरे काङ्ग्रेस्-नेतुः राहुलगान्धिनः मतदाता-अधिकारयात्रायाः समये प्रधानमन्त्रिणं नरेन्द्रमोदिनं विरुध्य अपमानजनकभाषाप्रयोगस्य दृढतया निन्दाम् अकरोत्। सामाजिक-प्रसार-माध्यमे श्रीकुमारः अवदत् यत्, काङ्ग्रेस-पक्षस्य अथ आर्. जे. डी.-पक्षस्य च कार्यक्रमे प्रधानमन्त्रिणं विरुध्य अपमानजनकभाषायाः प्रयोगः अतीव आक्षेपार्हः अस्तीति। सः अवदत् यत्, येन प्रकारेण अशोभना भाषा प्रयुक्ता सा अत्यधिका अनुचिता अस्ति। अत्रान्तरे भाजपेति-दलम् अस्मिन् विषये दरभङ्गा-पटना-नगरयोः अनेकेषु आरक्षिस्थलेषु परिवादं दत्तवत्।

### बिहार-महिलायोजना

बिहारसर्वकारेण मुख्यमन्त्री-महिला-रोज़गार-योजना अनुमोदिता। मुख्यमन्त्रिणः नितीशकुमारस्य आध्यक्ष्ये अद्य सञ्जाते मन्त्रिमण्डलीयोपवेशने अयं निर्णयो जातः। अस्याः योजनायाः अन्तर्गतं राज्ये प्रत्येकस्मात् परिवारात् एकस्यै महिलायै स्वेच्छया व्यवसाय-समारम्भणाय वित्तीयसाहाय्यं प्रदीयते । प्रथमदेयद्रव्यत्वेन चयनितमहिलायै स्वेष्टव्यवसायार्थं दशसहस्ररुप्यकाणि प्रदास्यन्ते। आवेदन-प्रक्रियेयं अचिरादेव समारप्स्यते। आगामि-मासादेव लाभार्थि-महिलानां बैंक-कोषेषु धनराशिः हस्तान्तरिष्यते।

**राष्ट्रपति- स्कोप पुरस्कारः**

राष्ट्रपतिः द्रौपदी मुर्मू अद्य नवदेहली-नगरे सार्वजनिकक्षेत्रोद्यमानां कृते 2022-23 स्कोप एमिनन्स् पुरस्कारान् दत्तवती। सभाम् सम्बोधयन्ती राष्ट्रपतिपदासीना मुर्मुः अवदत् यत्, सार्वजनिकक्षेत्रस्य उद्यमाः स्वातन्त्र्यादारभ्य आर्थिकवृद्धेः सामाजिक-समावेशनस्य च प्रबलसाधनभूताः सन्ति।

केन्द्रीय-वित्त-राज्यमन्त्री पङ्कजचौधरी अवदत् यत्, सार्वजनिक-क्षेत्र-उद्यमाः राष्ट्रनिर्माणार्थं महत्त्वपूर्णं योगदानं ददति, वैश्विक-मञ्चे अपि मुद्रां स्थापयन्तीति।

**न्यायाधीशस्य प्रतिज्ञा**

भारतस्य मुख्यन्यायाधीशः बी.आर. गवई इत्येषः अद्य सर्वोच्चन्यायालयस्य नवनियुक्ताभ्यां न्यायाधीशाभ्यां पदगोपनीयतयोः शपथवचनं दापितवान्। न्यायाधीशः अलोक् अराधे, न्यायाधीशः विपुल् मनुभाय् पञ्चोली च सर्वोच्चन्यायालयस्य न्यायाधीशरूपेण शपथं स्वीकृतवन्तौ।

**अमित-शाह ब्रह्मपुत्रप्रभागः**

केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य गुवाहाट्यां राजभवनस्य नवनिर्मितस्य ब्रह्मपुत्र-विभागस्य उद्घाटनम् अकरोत्, तदनन्तरं गोलाघाटेति क्षेत्रे राष्ट्रिय-साईबर-फोरेन्सिक-प्रयोगशालायाः ई-उद्घाटनम्, सशस्त्र-बलानां विविध-विकास-परियोजनानां शिलान्यासोद्घाटनञ्च अकरोत्त्। गृहमन्त्री उक्तवान् यत् केन्द्रसर्वकारः देशस्य अपराध-न्यायव्यवस्थायां फोरेन्सिक्-साक्ष्य-आधारित-दृष्टिकोणम् प्राधान्यम् अददादिति।

**ईसीएचएस-रक्षामन्त्रालयः**

सर्वकारः पूर्वसैनिक-अंशदायी-स्वास्थ्य-योजनायाः विस्ताराय अनुमोदनं प्रायच्छत्। योजनेयं तेभ्यः अधिकारिभ्यः सौलभ्यं प्रदास्यति ये चिकित्साकारणात् प्रशिक्षणात् दूरीकृताः। सशस्त्रसेनामालक्ष्य स्वकीयप्रतिबद्धतां प्रकटीकर्तुं मन्त्रालयेन निर्णयोऽयं स्वीकृतः। रक्षामन्त्रालयेन प्रोदीरितं यत् इयं योजना तेभ्यः सैन्यप्रशिक्षार्थिभ्यः वर्तते ये प्रशिक्षणसमाप्तेः पूर्वमेव चिकित्सापरिषदा बहिष्कृताः। भविष्ये एतादृशाणां उपक्रमाणां इतोऽपि विस्तारः भवितुमर्हति।

**एस.ई.ई.आई.-शक्तिमन्त्रालयः**

विद्युत्मन्त्रालयेन अद्य राज्य-ऊर्जा-दक्षता-सूचकाङ्कः (एस्.ई.ई.आई.) चतुर्विंशत्यधिक-द्विसहस्रतमः प्रकाशितः। संस्थागतक्षेत्रे अयं सूचकाङ्कः महत्त्वपूर्णां भूमिकां निर्वहति।

**उत्तराखण्ड्-मेघस्फोटः**

उत्तराखण्ड्-राज्यस्य रुद्रप्रयाग-चमोली-मण्डलयोः मेघस्फोटैः महती क्षतिः अभवत्। प्रभावितेषु क्षेत्रेषु युद्धस्तरेण साहाय्योद्धारकार्याणि प्रचलन्ति। अस्माकं देहरादून-संवाददात्रा उक्तं यत्, चमोली-मण्डलस्य देवाल्-खण्डे एकस्मिन् गृहे क्षतिः अभवत्, यस्य परिणामेन द्वौ जनौ मृतौ। रुद्रप्रयागस्य मण्डल-दंडाधिकारी प्रतीक जैनः अवदत् यत् भग्नावशेषस्य अधः केचन जनाः अवरुद्धाः भवितुं शक्नुवन्तीति सम्भावनास्ति।

**जम्मू-कश्मीर-ऋतुः**

जम्मू-कश्मीर-प्रदेशे, जम्मू-विभागस्य रेल-यातायातः अद्य निरन्तरतया चतुर्थदिनं यावत् पूर्णतया स्थगितः अस्ति, येन क्षेत्रेऽस्मिन् रेलयातायात-सेवा पक्षाघातग्रस्ता जायमानास्ति। अद्य चत्वारिंशत् रेलयानान्यपि निरस्तानि।

**हिमाचल-ऋतुः**

हिमाचलप्रदेशे वृष्टिकालिक-क्रियाकलापैः सामान्यजनजीवने गभीरः प्रभावः जातोऽस्ति। प्रचण्डवृष्ट्या भूस्खलनेन च, द्वाभ्यां राष्ट्रियराजमार्गाभ्यां सह अन्येषु च षड्शताधिकमार्गेषु अवरोधः अस्ति।

**हॉकी**

अद्य राष्ट्रिय-क्रीडा-दिवसः अस्ति, दिवसोऽयम् महतः हाकी-क्रीडकस्य मेजर ध्यानचन्द इत्यस्य जन्मवार्षिक्याम् समाचर्यते। क्रीडायाः शारीरिक -क्रियाकलापानाञ्च महत्त्वं प्रतिपादयितुं दिवसोऽयं आचर्यते। अस्मिन् अवसरे प्रधानमन्त्रिणा नरेन्द्रमोदिना शुभाशयाः प्रेषिताः।

।। इति वार्ता: ।।